श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीतम्

# ॥ श्री वैराग्यपञ्चकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वैराग्यपञ्चकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

क्षोणीकोणशतांशपालनकलादुर्वारगर्वानल -
क्षुभ्यत्क्षुद्रनरेन्द्रचाटुरचनाधन्यान् न मन्यामहे।
देवं सेवितुमेव निश्चिनुमहे योऽसौ दयाळुः पुरा
धानामुष्टिमुचे कुचेलमुनये दत्ते स्म वित्तेशताम् ॥ 1 ॥

सिलं किमनलं भवेदनलमौदरं बाधितुं
पयः प्रसृतिपूरकं किमु न धारकं सारसम्।
अयत्नमलमल्लकं पथि पटच्चरं कच्चरं
भजन्ति विबुधा मुधा ह्यहह कुक्षितः कुक्षितः ॥ 2 ॥

ज्वलतु जलधिक्रोडक्रीडत्कृपीडभवप्रभा -
प्रतिभटपटुज्वालामालाकुलो जठरानलः।
तृणमपि वयं सायं सम्फुल्लमल्लिमतल्लिका -
परिमळमुचा वाचा याचामहे न महीश्वरान् ॥ 3 ॥

दुरीश्वरद्वारबहिर्वितर्दिका -
दुरासिकायै रचितोऽयमञ्जलिः।
यदञ्जनाभं निरपायमस्ति मे
धनञ्जयस्यन्दनभूषणं धनम् ॥ 4 ॥

शरीरपतनावधि प्रभुनिषेवणापादनात्
अबिन्धनधनञ्जयप्रशमदं धनं दन्धनम्।
धनञ्जयविवर्धनं धनमुदूढगोवर्धनं
सुसाधनमबाधनं सुमनसां समाराधनम्॥ **5**॥

नास्ति पित्रार्जितं किञ्चित् न मया किञ्चिदार्जितम्।
अस्ति मे हस्तिशैलाग्रे वस्तु पैतामहं धनम्॥ **6**॥

॥ इति श्री वैराग्यपञ्चकं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥